श्री सुब्रह्मण्य वज्रपंजर कवचं

श्री सुब्रह्मण्य वज्रपंजर कवचं

अस्य श्री सुब्रह्मण्य कवचस्तोत्र महामंत्रस्य अगस्त्यो भगवान् ऋषिः, अनुष्टुप्छंदः श्री सुब्रह्मण्यो देवता, सं बीजं, स्वाहा शक्तिः, सः कीलकं, श्री सुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे विनियोगः |

न्यासः –
हिरण्यशरीराय अंगुष्ठाभ्यां नमः |
इक्षुधनुर्धराय तर्जनीभ्यां नमः |
शरवणभवाय मध्यमाभ्यां नमः |
शिखिवाहनाय अनामिकाभ्यां नमः |
शक्तिहस्ताय कनिष्ठिकाभ्यां नमः |
सकलदुरितमोचनाय करतलकरपृष्ठाभ्यां नमः |
एवं हृदयादि न्यासः | |

ध्यानं |
कनककुंडलमंडितषण्मुखं
वनजराजि विराजित लोचनं |
निशित शस्त्रशरासनधारिणं
शरवणोद्भवमीशसुतं भजे | |

लमित्यादि पंचपूजा कुर्यात् |

अगस्त्य उवाच |
स्कंदस्य कवचं दिव्यं नाना रक्षाकरं परं |
पुरा पिनाकिना प्रोक्तं ब्रह्मणोऽनंतशक्तये | | 1 | |

तदहं संप्रवक्ष्यामि भद्रं ते शृणु नारद |
अस्ति गुह्यं महापुण्यं सर्वप्राणि प्रियंकरं | | 2 | |

जपमात्रेण पापघ्नं सर्वकामफलप्रदं |
मंत्रप्राणमिदं ज्ञेयं सर्वविद्यादिकारकं | | 3 | |

स्कंदस्य कवचं दिव्यं पठनाद्व्याधिनाशनं |
पिशाच घोरभूतानां स्मरणादेव शांतिदं || 4 ||

पठितं स्कंदकवचं श्रद्धयानन्यचेतसा |
तेषां दारिद्र्यदुरितं न कदाचिद्भविष्यति || 5 ||

भूयः साम्राज्यसंसिद्धिरंते कैवल्यमक्षयं |
दीर्घायुष्यं भवेत्तस्य स्कंदे भक्तिश्च जायते || 6 ||

अथ कवचं |
शिखां रक्षेत्कुमारस्तु कार्तिकेयः शिरोऽवतु |
ललाटं पार्वतीसूनुः विशाखो भ्रूयुगं मम || 7 ||

लोचने क्रौंचभेदी च नासिकां शिखिवाहनः |
कर्णद्वयं शक्तिधरः कर्णमूलं षडाननः || 8 ||

गंडयुग्मं महासेनः कपोलौ तारकांतकः |
ओष्ठद्वयं च सेनानीः रसनां शिखिवाहनः || 9 ||

तालू कळानिधिः पातु दंतां देवशिखामणिः |
गांगेयश्चुबुकं पातु मुखं पातु शरोद्भवः || 10 ||

हनू हरसुतः पातु कंठं कारुण्यवारिधिः |
स्कंधावुमासुतः पातु बाहुलेयो भुजद्वयं || 11 ||

बाहू भवेद्भवः पातु स्तनौ पातु महोरगः |
मध्यं जगद्विभुः पातु नाभिं द्वादशलोचनः || 12 ||

कटिं द्विषड्भुजः पातु गुह्यं गंगासुतोऽवतु |
जघनं जाह्नवीसूनुः पृष्ठभागं परंतपः || 13 ||

ऊरू रक्षेदुमापुत्रः जानुयुग्मं जगद्गुरः |
जंघे पातु जगत्पूज्यः गुल्फौ पातु महाबलः || 14 ||

पादौ पातु परंज्योतिः सर्वांगं कुक्कुटध्वजः |
ऊर्ध्वं पातु महोदारः अधस्तात्पातु शांकरिः || 15 ||

पार्श्वयोः पातु शत्रुघ्नः सर्वदा पातु शाश्वतः |
प्रातः पातु परं ब्रह्म मध्याह्ने युद्धकौशलः || 16 ||

अपराह्ने गुहः पातु रात्रौ दैत्यांतकोऽवतु |
त्रिसंध्यं तु त्रिकालज्ञः अंतस्थं पात्वरिंदमः || 17 ||

बहिस्थितं पातु खड्गी निषण्णं कृत्तिकासुतः |
व्रजंतं प्रथमाधीशः तिष्ठंतं पातु पाशभृत् || 18 ||

शयने पातु मां शूरः मार्गे मां पातु शूरजित् |
उग्रारण्ये वज्रधरः सदा रक्षतु मां वटुः || 19 ||

फलश्रुतिः |
सुब्रह्मण्यस्य कवचं धर्मकामार्थमोक्षदं |
मंत्राणां परमं मंत्रं रहस्यं सर्वदेहिनां || 20 ||

सर्वरोगप्रशमनं सर्वव्याधिविनाशनं |
सर्वपुण्यप्रदं दिव्यं सुभगैश्वर्यवर्धनं || 21 ||

सर्वत्र शुभदं नित्यं यः पठेद्वज्रपंजरं |
सुब्रह्मण्यः सुसंप्रीतो वांछितार्थान् प्रयच्छति |
देहांते मुक्तिमाप्नोति स्कंदवर्मानुभावतः || 22 ||

इति स्कांदे अगस्त्यनारदसंवादे सुब्रह्मण्य कवचं |